# उदकशांति मंत्राः

(कृष्णयजुर्वेद)

www.geocities.com/udakashanti
Last updated on: Friday, January 09, 2004

## ।। उदकशांति मंत्राः ।।

श्री गुरुभ्यो नमः हरिः ओम्। (अस्मद्गुरुभ्यो नमः हरिः ओम्।)

अग्निमीळे पुरोहितं यज्ञस्य देवमृत्विजम्। होतारं रत्नधातमम्।।

हरिः ओम्।। हरिः ओम्।।

इषे त्वोर्जेत्वा वायवस्थो पायवस्थ देवो वस्सविता प्रार्पयतु श्रेष्ठतमाय कर्मण

आप्यायध्वमघ्निया देवभागमूर्जस्वतीः पयस्वतीः प्रजावतीरनमीवा

अयख्ष्मामावस्तेन ईशत माऽघशगं सो रुद्रस्य हेतिः परिवो वृणक्तु ध्रुवा

अस्मिन्गोपतौ स्यात बह्वीर्यजमानस्य पशून्पाहि।। हरिः ओम्।। हरिः ओम्।।

अग्न आयाहि वीतये गृणानो हव्यदातये। नि होता सथ्सि बर्हिषि।।

हरिः ओम्।। हरिः ओम्।।

शं नो देवीरभिष्टय आपो भवन्तु पीतये। शं योरभिस्स्रवन्तु नः।।

हरिः ओम्।। हरिः ओम्।।

कृणुष्वपाजः प्रसितिं न पृथ्वीं याहि राजे वामवागं इभेन।

तृष्वीमनुप्रसितिंद्रूणानोस्तासि विध्य रख्षसस्तपिष्ठैः।

तवभ्रमास आशुया पतंत्यनुस्पृश धृषताशोशुचानः।

तपूग्ंष्यग्ने जुह्वापतंगान संदितो विसृज विष्वगुल्काः।

प्रतिस्पशो विसृजतूर्णितमो भवापायुर्विशो अस्या अदब्धः।

यो नो दूरे अघशग्ंसो यो अंत्यग्ने माकिष्टे व्यथिरादधर्षीत्।

उदग्ने तिष्ठप्रत्यातनुष्वन्यमित्राग्ं ओषतात्तिग्महेते।

यो नो अरातिग्ं समिधान चक्रे नीचा तं धख्यतसं न शुष्कम्।

ऊर्ध्वो भव प्रतिविध्याध्यस्मदाविष्कृणुष्व दैव्यान्यग्ने।

अवस्थिरा तनुहि यातुजूनां जामिमजामिं प्रमृणीहि शत्रून्।

स ते जानाति सुमतिं य विष्ठ य ईवते ब्रह्मणे गातुमैरत्।

विश्वान्यस्मै सुदिनानि रायो द्युम्नान्यर्यो विदुरो अभिद्यौत्।

सेदग्ने अस्तु सुभगस्सुदानुर्यस्त्वानित्येन हविषा य उक्थैः।

पिप्रीषति स्व आयुषि दुरोणे विश्वेदस्मै सुदिना सासदिष्टिः।

अर्चामि ते सुमतिं घोष्यर्वाख्सं ते वावाता जरतामियंगीः।

स्वश्वास्त्वा सुरथा मर्जयेमास्मे ख्षत्राणि धारयेरनु द्यून्।

इह त्वा भूर्याचरेदुपत्मन्दोषावस्तर्दीदिवाग्ंसमनु द्यून्।

क्रीडंतस्त्वासुमनसस्सपेमाभिद्युम्ना तस्थिवाग्ंसो जनानाम्।

यस्त्वा स्वश्वस्सुहिरण्यो अग्न उपयाति वसुमता रथेन।

तस्य त्राता भवसि तस्य सखायस्त आतिथ्यमानुषग्जुजोषत्।

महोरुजामि बंधुता वचोभिस्तन्मा पितुर्गोतमादन्वियाय।

त्वं नो अस्य वचसश्चिकिद्धि होतर्यविष्ठ सुक्रतो दमूनाः।

अस्वप्नजस्तरणयस्सुशेवा अतंद्रासोऽवृका अश्रमिष्ठाः।

ते पायवस्सध्रियंचो निषद्याग्ने तवनः पांत्वमूर।

ये पायवो मामतेयं ते अग्ने पश्यंतो अंधं दुरितादरख्षन्न्।

ररख्षतान्थ्सुकृतो विश्ववेदा दिप्संत इद्रिपवो नाह देभुः।

त्वया वयग्ं सधन्यस्त्वोतास्तव प्रणीत्यश्याम वाजान्।

उभाशग्ंसा सूदय सत्यतातेऽनुष्टुया कृणुह्यह्रयाण।

अया ते अग्ने समिधा विधेम प्रतिस्तोमग्ं शस्यमानं गृभाय।

दहाशसो रख्षसः पाह्यस्मान्द्रुहो निदो मित्रमहो अवद्यात्।

रख्षोहणं वाजिनमाजिघर्मि मित्रं प्रथिष्ठमुपयामि शर्म।

शिशानो अग्निः क्रतुभिस्समिद्धस्सनो दिवा स रिषः पातु नक्तम्।

विज्योतिषा बृहता भात्यग्निराविर्विश्वानि कृणुतेमहित्वा।

प्रादेवीर्मायास्सहते दुरेवाश्शिशीते शृंगे रख्षसे विनिख्षे।

उतस्वानासो दिविषन्त्वग्ने स्तिग्मायुधा रख्षसे हन्त वा उ॥

इंद्रं वो विश्वतस्परिहवामहे जनेभ्यः। अस्माकमस्तु केवलः।

इंद्रं नरो नेमधिता हवन्ते यत्पार्यायुनजते धियस्ताः।

शूरो नृषाता शवसश्चकान आगोमति व्रजेभजा त्वंनः।

इंद्रियाणि शतक्रतो या ते जनेषु पंचसु। इंद्रतानि त आवृणे।

अनु ते दायि मह इंद्रियाय सत्रा ते विश्वमनु वृत्रहत्ये।

अनु ख्षत्रमनु सहो यजत्रेंद्र देवेभिरनु ते नृषह्ये।

आयस्मिन्थ्सप्तवासवास्तिष्ठन्ति स्वारुहो यथा।

ऋषिर् ह दीर्घश्रुत्तम इंद्रस्य घर्मो अतिथिः।

आमासु पक्वमैरय आसूर्यग्ं रोहयो दिवि।

घर्मं न सामन्तपता सुवृक्तिभिर्जुष्टं गिर्वणसे गिरः।

इंद्रमिद्गाथिनो बृहदिंद्रमर्केभिरर्किणः। इंद्रं वाणीरनूषत।

गायन्ति त्वा गायत्रिणोर्चन्त्यर्कमर्किणः।

ब्रह्माणस्त्वा शतक्रतवुद्वग्ं शमिव येमिरे।

अग्ंहोमुचे प्रभरेमा मनीषामोषिष्ठदाव्न्ने सुमतिं गृणानाः।

इदमिंद्र प्रति हव्यं गृभाय सत्यास्सन्तु यजमानस्य कामाः।

विवेष यन्माधिषणा जजान स्तवै पुरा पार्यादिंद्रमह्नः।

अगंहसो यत्र पीपरद्यथानो नावेव यान्तमुभये हवन्ते।

प्रसंराजं प्रथममध्वराणामगंहोमुचं वृषभं यज्ञियानाम्।

अपां नपातमश्विना हयन्तमस्मिन्नर इंद्रियं धत्तमोजः।

विन इंद्र मृधो जहि नीचायच्छ पृतन्यतः।

अधस्पदं तमीं कृधि यो अस्मागं अभिदासति।

इंद्रख्षत्रमभि वाममोजोऽजायथा वृषभ चर्षणीनाम्।

अपानुदो जनममित्रयन्तमुरुं देवेभ्यो अकृणोरुलोकम्।

मृगो न भीमः कुचरो गिरिष्ठाः परावत आजगामा परस्याः।

सृकगं सगंशाय पविमिंद्र तिग्मं विशत्रून्ताढिविमृधो नुदस्व।

विशत्रून्, विमृधोनुद विवृत्रस्य हनूरुज।

विमन्युमिंद्र भामितोऽमित्रस्याभिदासतः।

त्रातारमिंद्रमवितारमिंद्रगं हवेहवे सुहवगं शूरमिंद्रम्।

हुवेनुशक्रं पुरुहूतमिंद्रग्ग् स्वस्तिनो मघवाधात्विंद्रः।

माते अस्यागं सहसावन्परिष्टावघाय भूमहरिवः परादै।

त्रायस्वनोऽवृकेभिर्वरूथैस्तव प्रियासस्सूरिषु स्याम।

अनवस्ते रथमश्वाय तख्षन्त्वष्टा वज्रं पुरुहूत द्युमन्तम्।

ब्रह्माण इंद्रं महयंतो अर्कैरवर्धयन्नहये हंत वा उ।

वृष्णे यत्ते वृषणो अर्कमर्चानिंद्र ग्रावाणो अदितिस्सजोषाः।

अनश्वासो ये पवयोऽरथा इंद्रेषिता अभ्यवर्तंत दस्यून्॥

यत इंद्र भयामहे ततो नो अभयं कृधि।

मघवञ्छग्धि तव तन्न ऊतये विद्विषो विमृधो जहि॥

स्वस्तिदा विशस्पतिर्वृत्रहा विमृधो वशी।

वृषेंद्रः पुर एतु नस्वस्तिदा अभयंकरः॥

महाग् इंद्रो वज्रबाहुष्षोडशी शर्मयच्छतु।

स्वस्ति नो मघवा करोतु हंतु पाप्मानं योऽस्मान्द्वेष्टि।

सजोषा इंद्र सगणो मरुद्भिस्सोमं पिब वृत्रहञ्छूर विद्वान्।

जहि शत्रूग्ंरपमृधो नुदस्वाथाभयं कृणुहि विश्वतो नः॥

ये देवाः पुरस्सदोग्निनेत्रा रख्षोहणस्तेनः पांतु तेनोऽवंतु तेभ्यो नमस्तेभ्यस्स्वाहा

ये देवा दख्षिणसदो यमनेत्रा रख्षोहणस्तेनः पांतु तेनोऽवंतु तेभ्यो

नमस्तेभ्यस्स्वाहा ये देवाः पश्चात्सदस्सवितृनेत्रा रख्षोहणस्तेनः पांतु तेनोऽवंतु

तेभ्यो नमस्तेभ्यस्स्वाहा ये देवा उत्तरसदो वरुणनेत्रा रख्षोहणस्तेनः पांतु

तेनोऽवंतु तेभ्यो नमस्तेभ्यस्स्वाहा ये देवा उपरिषदो बृहस्पतिनेत्रा रख्षोहणस्तेनः
पांतु तेनोऽवंतु तेभ्यो नमस्तेभ्यस्स्वाहाऽग्नये रख्षोघ्ने स्वाहा यमाय रख्षोघ्ने
स्वाहा सवित्रे रख्षोघ्ने स्वाहा वरुणाय रख्षोघ्ने स्वाहा बृहस्पतये दुवस्वते
रख्षोघ्ने स्वाहा।।

अग्निरायुष्मान्थ्सवनस्पतिभिरायुष्मान्तेन त्वाऽयुषाऽयुष्मन्तं करोमि
सोम आयुष्मान्थ्स ओषधीभिरायुष्मान्तेन त्वाऽयुषाऽयुष्मन्तं करोमि
यज्ञ आयुष्मान्थ्सदख्षिणाभिरायुष्मान्तेन त्वाऽयुषाऽयुष्मन्तं करोमि
ब्रह्मायुष्मत्तद्ब्राह्मणैरायुष्मत्तेन त्वाऽयुषाऽयुष्मन्तं करोमि
देवा आयुष्मंतस्तेऽमृतेनायुष्मन्तस्तेन त्वाऽयुषाऽयुष्मन्तं करोमि।।

या वामिंद्रावरुणा यतव्या तनूस्तयेममग्ंहसो मुंचतं
या वामिंद्रावरुणा सहस्यातनूस्तयेममग्ंहसो मुंचतं
या वामिंद्रावरुणा रख्षस्या तनूस्तयेममग्ंहसो मुंचतं
या वामिंद्रावरुणा तेजस्यातनूस्तयेममग्ंहसो मुंचतं
यो वामिंद्रावरुणावग्नौ स्रामस्तं वामेतेनावयजे

यो वामिंद्रावरुणा द्विपाथ्सु पशुषु स्रामस्तं वामेतेनावयजे

यो वामिंद्रावरुणा चतुष्पाथ्सु स्रामस्तं वामेतेनावयजे

यो वामिंद्रावरुणा गोष्ठे स्रामस्तं वामेतेनावयजे

यो वामिंद्रावरुणा गृहेषु स्रामस्तं वामेतेनावयजे

यो वामिंद्रावरुणाफ्सु स्रामस्तं वामेतेनावयजे

यो वामिंद्रावरुणौषधीषु स्रामस्तं वामेतेनावयजे

यो वामिंद्रावरुणा वनस्पतिषु स्रामस्तं वामेतेनावयजे॥

अग्ने यशस्विन्, यशसेममर्पयेंद्रावतीमपचितीमिहावह।

अयं मूर्धा परमेष्ठी सुवर्चास्समानानामुत्तमश्लोको अस्तु।

भद्रं पश्यंत उपसेदुरग्रे तपो दीख्षामृषयस्सुवर्विदः।

ततः, ख्षत्रं बलमोजश्च जातं तदस्मै देवा अभि सं नमंतु।

धाता विधाता परमोत संदृक्प्रजापतिः परमेष्ठी विराजा।

स्तोमाश्छंदाग्ंसि निविदो म आहुरेतस्मै राष्ट्रमभि सन्नमाम।

अभ्यावर्तध्वमुपमेत साकमयगं् शास्ताऽधिपतिर्वो अस्तु।

अस्य विज्ञानमनु सग्ंरभध्वमिमं पश्चादनुजीवाथ सर्वे॥

ऋताषाड़ृतधामाग्निर्गंधर्वस्स

इदं ब्रह्मखष्त्रं पातु तस्मै स्वाहा तस्यौषधयोफ्सरस ऊर्जोनाम ता

इदं ब्रह्मखष्त्रं पांतु ताभ्यस्स्वाहा सग्ंहितो विश्वसामा सूर्यो गंधर्वस्स

इदं ब्रह्मखष्त्रं पातु तस्मै स्वाहा तस्य मरीचयोऽफ्सरस आयुवो नाम ता

इदं ब्रह्मखष्त्रं पांतु ताभ्यस्स्वाहा सुषुम्नस्सूर्यरश्मिश्चंद्रमा गंधर्वस्स

इदं ब्रह्मखष्त्रं पातु तस्मै स्वाहा तस्य नखत्राण्यफ्सरसो बेकुरयो नाम ता

इदं ब्रह्मखष्त्रं पांतु ताभ्यस्स्वाहा भुज्युस्सुपर्णो यज्ञो गंधर्वस्स

इदं ब्रह्मखष्त्रं पातु तस्मै स्वाहा तस्य दख्षिणा अफ्सरसस्तवा नाम ता

इदं ब्रह्मखष्त्रं पांतु ताभ्यस्स्वाहा प्रजापतिर्विश्वकर्मा मनो गंधर्वस्स

इदं ब्रह्मखष्त्रं पातु तस्मै स्वाहा तस्यख्सामान्यफ्सरसो वह्नयो नाम ता

इदं ब्रह्मखष्त्रं पांतु ताभ्यस्स्वाहेषिरो विश्वव्यचा वातो गंधर्वस्स

इदं ब्रह्मखष्त्रं पातु तस्मै स्वाहा तस्यापोफ्सरसो मुदानाम ता

इदं ब्रह्मखष्त्रं पांतु ताभ्यस्स्वाहा भुवनस्यपते यस्यत उपरि गृहा इह च।

स नो रास्वाज्यानिग्ं रायस्पोषग्ं सुवीर्यग्ं संवथ्सरीणाग्स्वस्तिग्ग् स्वाहा

परमेष्ठ्यधिपतिर्मृत्युर्गंधर्वस्स इदं ब्रह्मखत्रं पातु तस्मै स्वाहा तस्य
विश्वमफ्सरसो भुवो नाम ता इदं ब्रह्मखत्रं पांतु ताभ्यस्स्वाहा
सुखितिस्सुभूतिर्भद्रकृथ्सुवर्वान्पर्जन्यो गंधर्वस्स इदं ब्रह्मखत्रं पातु तस्मै
स्वाहा तस्य विद्युतोऽफ्सरसो रुचो नाम ता इदं ब्रह्मखत्रं पांतु ताभ्यस्स्वाहा
दूरेहेतिरमृडयो मृत्युर्गंधर्वस्स इदं ब्रह्मखत्रं पातु तस्मै स्वाहा तस्य प्रजा
अफ्सरसो भीरुवो नाम ता इदं ब्रह्मखत्रं पांतु ताभ्यस्स्वाहा चारुः कृपणकाशी
कामो गंधर्वस्स इदं ब्रह्मखत्रं पातु तस्मै स्वाहा
तस्याधयोऽफ्सरसश्शोचयंतीर्नाम ता इदं ब्रह्मखत्रं पांतु ताभ्यस्स्वाहा स नो
भुवनस्यपते यस्य त उपरि गृहा इह च।
उरु ब्रह्मणेऽस्मै खत्राय महि शर्म यच्छ स्वाहा।।

नमो अस्तु सर्पेभ्यो ये के च पृथिवीमनु।
ये अंतरिखे ये दिवि तेभ्यस्सर्पेभ्यो नमः।
येऽदो रोचने दिवो ये वा सूर्यस्य रश्मिषु।
येषामफ्सुसदः कृतं तेभ्यस्सर्पेभ्यो नमः।
या इषवो यातुधानानां ये वा वनस्पतीग्ंरनु।

येवाऽवटेषु शेरते तेभ्यस्सर्पेभ्यो नमः॥

अयं पुरो हरिकेशस्सूर्यरश्मिस्तस्य रथगृथ्सश्च रथौजाश्च सेनानिग्रामण्यौ
पुंजिकस्थला च कृतस्थला चाप्सरसौ यातुधानाहेती रख्षाग्ंसि
प्रहेतिस्तेभ्यो नमस्ते नो मृडयंतु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधाम्ययं
दख्षिणा विश्वकर्मा तस्य रथस्वनश्च रथे चित्रश्च सेनानिग्रामण्यौ
मेनका च सहजन्या चाप्सरसौ दंख्ष्णवः पशवो हेतिः पौरुषेयो वधः
प्रहेतिस्तेभ्यो नमस्ते नो मृडयंतु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधाम्ययं
पश्चाद्विश्वव्यचास्तस्य रथप्रोतश्चासमरथश्च सेनानिग्रामण्यौ
प्रम्लोचंती चानुम्लोचंती चाप्सरसौ सर्पाहेतिर्व्याघ्राः प्रहेतिस्तेभ्यो नमस्ते नो
मृडयंतु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधाम्यय–
मुत्तराथ्संयद्वसुस्तस्य सेनजिच्च सुषेणश्च सेनानिग्रामण्यौ विश्वाची च घृताची
चाप्सरसावापो हेतिर्वातः प्रहेतिस्तेभ्यो नमस्ते नो मृडयंतु ते यं द्विष्मो यश्च नो
द्वेष्टि तं वो जंभे दधाम्ययमुपर्यर्वाग्वसुस्तस्य तार्ख्र्यश्चारिष्टनेमिश्च
सेनानिग्रामण्यावुर्वशी च पूर्वचित्तिश्चाप्सरसौ विद्युद्धेतिरवस्फूर्जन् प्रहेतिस्तेभ्यो
नमस्ते नो मृडयंतु ते यं द्विष्मो यश्च नो द्वेष्टि तं वो जंभे दधामि॥

आशुश्शिशानो वृषभो न युध्मो घनाघनः, ख्षोभणश्चर्षणीनाम्।

संक्रंदनोऽनिमिष एक वीरश्शतगंसेना अजयथ्साकमिंद्रः।

संक्रंदनेना निमिषेण जिष्णुनायुत्कारेण दुश्च्यवनेन धृष्णुना।

तदिंद्रेण जयत तथ्सहध्वं युधो नर इषुहस्तेन वृष्णा।

स इषुहस्तैस्सनिषंगिभिर्वशीसग्ग्स्रष्टा स युध इंद्रो गणेन।

सग्ंसृष्टजिथ्सोमपा बाहुशर्ध्यूर्ध्वधन्वा प्रतिहिताभिरस्ता।

बृहस्पते परिदीया रथेन रख्षोहाऽमित्राग्ं अपबाधमानः।

प्रभंजन्थ्सेनाः प्रमृणो युधा जयन्नस्माकमेध्यविता रथानाम्।

गोत्रभिदं गोविदं वज्रबाहुं जयंत मज्मप्रमृणं तमोजसा।

इमग्ं सजाता अनुवीरयध्वमिंद्रग्ं सखायोऽनु सग्ं रभध्वम्।

बलविज्ञायस्स्थविरः प्रवीरस्सहस्वान्, वाजी सहमान उग्रः।

अभिवीरो अभिसत्वा सहोजा जैत्रमिंद्र रथमातिष्ठ गोवित्।

अभि गोत्राणि सहसा गाहमानोऽदायो वीरश्शतमन्युरिंद्रः।

दुश्च्यवनः पृतनाषाडयुध्योस्माकग्ं सेना अवतु प्र युथ्सु।

इंद्र आसां नेता बृहस्पतिर्दख्षिणा यज्ञः पुर एतु सोमः।

देवसेनानामभिभंजतीनां जयंतीनां मरुतो यंत्वग्रे।

इंद्रस्य वृष्णो वरुणस्य राज्ञ आदित्यानां मरुताग्ं शर्ध उग्रम्।

महामनसां भुवनच्यवानां घोषो देवानां जयतामुदस्थात्।

अस्माकमिंद्रस्समृतेषु ध्वजेष्वस्माकं या इषवस्ता जयंतु।

अस्माकं वीरा उत्तरे भवंत्वस्मानु देवा अवता हवेषु।

उद्धर्षय मघवन्नायुधान्युथ्सत्वनां मामकानां महाग्ंसि।

उद्वृत्रहन्वाजिनां वाजिनान्युद्रथानां जयतामेतु घोषः।

उप प्रेत जयता नरस्स्थिरा वस्संतु बाहवः।

इंद्रोवश्शर्म यच्छत्वनाधृष्या यथाऽसथ।

अवसृष्टा परा पत शरव्ये ब्रह्मसग्ंशिता।

गच्चामित्रान्प्रविशमैषां कंचनोच्छिषः।

मर्माणि ते वर्मभिश्छादयामि सोमस्त्वा राजामृतेनाभिवस्ताम्।

उरोर्वरीयो वरिवस्ते अस्तु जयंतं त्वामनु मदंतु देवाः।

यत्र बाणास्संपतंति कुमारा विशिखा इव।

इंद्रोनस्तत्र वृत्रहा विश्वाहा शर्म यच्छतु॥

शं च मे मयश्च मे प्रियं च मेऽनुकामश्च मे कामश्च मे सौमनसश्च मे भद्रं च मे श्रेयश्च मे वस्यश्च मे यशश्च मे भगश्च मे द्रविणं च मे यंता च मे धर्ता च मे ख्षेमश्च मे धृतिश्च मे विश्वं च मे महश्च मे संविच्च मे ज्ञात्रं च मे सूश्च मे प्रसूश्च मे सीरं च मे लयश्च म ऋतं च मेऽमृतं च मेऽयख्ष्मं च मेऽनामयच्च मे जीवातुश्च मे दीर्घायुत्वं च मेऽनमित्रं च मेऽभयं च मे सुगं च मे शयनं च मे सूषा च मे सुदिनं च मे।।

ममाग्ने वर्चो विहवेष्वस्तु वयं त्वेंधानास्तनुवं पुषेम।
मह्यं नमंतां प्रदिशश्चतस्र स्त्वयाऽध्यख्षेण पृतना जयेम।
मम देवा विहवे संतु सर्व इंद्रावंतो मरुतो विष्णुरग्निः।
ममांतरिख्ष मुरु गोपमस्तु मह्यं वातः पवतां कामे अस्मिन्।
मयि देवा द्रविणमायजंतां मय्याशीरस्तु मयि देवहूतिः।
दैव्या होताराव निषंत पूर्वेऽरिष्टास्स्याम तनुवा सुवीराः।
मह्यं यजंतु मम यानि हव्याऽकूतिस्सत्या मनसो मे अस्तु।
एनो मानिगां कतमच्चनाहं विश्वे देवासो अधि वोचता मे।
देवीष्षडुर्वीरुरुणः कृणोत विश्वे देवास इह वीरयध्वम्।

माहास्महि प्रजया मा तनूभिर्मारधाम द्विषते सोमराजन्।

अग्निर्मन्युं प्रतिनुदन्पुरस्तादद्बधो गोपाः परि पाहि नस्त्वम्।

प्रत्यंचो यंतु निगुतः पुनस्तेऽमैषां चित्तं प्रबुधा विनेशत्।

धाता धातृणां भुवनस्य यस्पतिर्देवग्ं सवितारमभिमातिषाहम्।

इमं यज्ञमश्विनोभा बृहस्पतिर्देवाः पांतु यजमानं न्यर्थात्।

उरुव्यचानो महिषश्शर्मयग्ं सदस्मिन्, हवे पुरुहूतः पुरुख्षु।

सनः प्रजायै हर्यश्व मृडयेंद्र मा नो रीरिषो मा परादाः।

ये नस्सपत्ना अपते भवंत्विंद्राग्निभ्यामव बाधामहे तान्।

वसवो रुद्रा आदित्या उपरि स्पृशं मोग्रं चेत्तारमधिराजमक्रन्न्।

अर्वांचमिंद्रममुतो हवामहे यो गोजिद्धनजिदश्वजिद्यः।

इमं नो यज्ञं विहवे जुषस्वास्य कुर्मो हरिवो मेदिनं त्वा॥

अग्नेर्मन्वे प्रथमस्य प्रचेतसो यं पांचजन्यं बहवस्समिंधते।

विश्वस्यां विशि प्रविविशिवाग्ं समीमहे स नो मुंचत्वग्ंहसः।

यस्येदं प्राणन्निमिषद्यदेजति यस्य जातं जनमानं च केवलम्।

स्तौम्यग्निं नाथितो जोहवीमि स नो मुंचत्वग्ंहसः।

इंद्रस्य मन्ये प्रथमस्य प्रचेतसो वृत्रघ्नस्स्तोमा उप मामुपागुः।

यो दाशुषस्सुकृतो हवमुप गंता स नो मुंचत्वगंहसः।

यस्संग्रामं नयति सं वशी युधे यः पुष्टानि सगंसृजति त्रयाणि।

स्तौमींद्रं नाथितो जोहवीमि स नो मुंचत्वगंहसः।

मन्वे वां मित्रावरुणा तस्य वित्तगं सत्यौजसा दृगंहणा यं नुदेथे।

या राजानगं सरथं याथउग्रा ता नो मुंचतमागसः।

यो वागं रथ ऋजुरश्मिस्सत्यधर्मामिथुश्चरंतमुपयातिदूषयन्न्।

स्तौमि मित्रावरुणा नाथितो जोहवीमि तौ नो मुंचतमागसः।

वायोस्सवितुर्विदथानि मन्महे यावात्मन्वद्बिभृतो यौ च रख्षतः।

यौ विश्वस्य परिभू बभूवतुस्तौनो मुंचतमागसः।

उपश्रेष्ठान आशिषो देवयोर्धर्मे अस्थिरन्न्।

स्तौमि वायुगं सवितारं नाथितो जोहवीमि तौ नो मुंचतमागसः।

रथीतमौ रथीनामह्व ऊतये शुभं गमिष्ठौ सुयमेभिरश्वैः।

ययोर्वां देवौ देवेष्वनिशितमोजस्तौ नो मुंचतमागसः।

यदयातं वहतुगं सूर्यायास्त्रि चक्रेण सगंसदमिच्छमानौ।

स्तौमि देवावश्विनौ नाथितो जोहवीमि तौ नो मुंचतमागसः।

मरुतां मन्वे अधि नो ब्रुवंतु प्रेमां वाचं विश्वामवंतु विश्वे।

आशून्, हुवे सुयमानूतये ते नो मुंचंत्वेनसः।

तिग्ममायुधं वीडितग् सहस्वद्दिव्यग् शर्धः पृतनासु जिष्णु।

स्तौमि देवान्मरुतो नाथितो जोहवीमि ते नो मुंचंत्वेनसः।

देवानां मन्वे अधि नो ब्रुवंतु प्रेमां वाचं विश्वामवंतु विश्वे।

आशून्, हुवे सुयमानूतये ते नो मुंचंत्वेनसः।

यदिदं माऽभिशोचति पौरुषेयेण दैव्येन।

स्तौमिविश्वान्देवान्नाथितो जोहवीमि ते नो मुंचंत्वेनसः।

अनुनोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम्।

अग्निश्च हव्यवाहनो भवतां दाशुषे मयः।

अन्विदनुमते त्वं मन्यासै शंच नः कृधि।

ऋत्वे दख्षाय नो हिनु प्रण आयूग्ंषि तारिषः।

वैश्वानरो न ऊत्या प्रयातु परावतः। अग्निरुक्थेन वाहसा।

पृष्टो दिवि पृष्टो अग्निः पृथिव्यां पृष्टो विश्वा ओषधीराविवेश।

वैश्वानरस्सहसा पृष्टो अग्निस्स नो दिवा सरिषः पातु नक्तम्।

ये अप्रथेताममितेभिरोजोभिर्ये प्रतिष्ठे अभवतां वसूनाम्।

स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुंचतमग्ंहसः।

उर्वी रोदसी वरिवः कृणोतं ख्षेत्रस्य पत्नी अधिनो ब्रूयातम्।

स्तौमि द्यावापृथिवी नाथितो जोहवीमि ते नो मुंचतमग्ंहसः।

यत्ते वयं पुरुषत्राय विष्ठाविद्वाग्ंसश्चकृमा कच्चनागः।

कृधीस्वस्माग् अदितेरनागा व्येनाग्ंसि शिश्रथो विष्वगग्ने।

यथा ह तद्वसवो गौर्यं चित्पदिषितामममुंचता यजत्राः।

एवा त्वमस्मत्प्रमुंचाव्यग्ंहः प्रातार्यग्ने प्रतरां न आयुः।

समीची नामासि प्राची दिक्तस्यास्तेऽग्निरधिपतिरसितो रख्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौ नो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधाम्योजस्विनी नामासि दख्षिणा दिक्तस्यास्त इंद्रोधिपतिः पृदाकू रख्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौनो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधामि प्राची नामासि प्रतीची दिक्तस्यास्ते सोमोऽधिपतिस्स्वजो रख्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौनो मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधाम्यवस्थावा नामास्युदीची दिक्तस्यास्ते वरुणोऽधिपतिस्तिरश्चराजी रख्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौनो मृडयतां ते यं द्विष्मो यश्च नो

द्वेष्टि तं वां जंभे दधाम्यधिपत्नी नामासि बृहती दिक्तस्यास्ते

बृहस्पतिरधिपतिश्श्वित्रो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौनो मृडयतां

ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधामि वशिनी नामासीयं दिक्तस्यास्ते

यमोऽधिपतिः कल्माषग्रीवो रक्षिता यश्चाधिपतिर्यश्च गोप्ता ताभ्यां नमस्तौनो

मृडयतां ते यं द्विष्मो यश्च नो द्वेष्टि तं वां जंभे दधामि॥

हेतयो नाम स्थ तेषां वः पुरोगृहा अग्निर्व इषवस्सलिलो वातनामं तेभ्यो वो

नमस्तेनो मृडयत ते यं द्विष्मो यश्चनो द्वेष्टि तं वो जंभे दधामि

निलिंपा नाम स्थ तेषां वो दक्षिणा गृहाः पितरो व इषवस्सगरो

वातनामं तेभ्यो वो नमस्तेनो मृडयत ते यं द्विष्मो यश्चनो द्वेष्टि तं वो जंभे दधामि

वज्रिणो नाम स्थ तेषां वः पश्चाद्गृहास्स्वप्नो व इषवो गह्वरो

वातनामं तेभ्यो वो नमस्तेनो मृडयत ते यं द्विष्मो यश्चनो द्वेष्टि तं वो जंभे

दधाम्यवस्थावानो नाम स्थ तेषां व उत्तराद्गृहा आपो व इषवस्समुद्रो

वातनामं तेभ्यो वो नमस्तेनो मृडयत ते यं द्विष्मो यश्चनो द्वेष्टि तं वो जंभे

दधाम्यधिपतयो नाम स्थ तेषां व उपरि गृहा वर्षं व इषवोऽवस्वान्,

वातनामं तेभ्यो वो नमस्तेनो मृडयत ते यं द्विष्मो यश्चनो द्वेष्टि तं वो जंभे दधामि
क्रव्या नाम स्थ पार्थिवास्तेषां व इह गृहा अन्नं व इषवो निमिषो वातनामं तेभ्यो
वो नमस्तेनो मृडयत ते यं द्विष्मो यश्चनो द्वेष्टि तं वो जंभे दधामि॥

शतायुधाय शतवीर्याय शतोतयेऽभिमातिषाहे।
शतं यो नश्शरदो अजीतानिंद्रो नेषदति दुरितानि विश्वा।
ये चत्वारः पथयो देवयाना अंतरा द्यावापृथिवी वियंति।
तेषां यो अज्यानिमजीतिमावहात्तस्मै नो देवाः परि दत्ते ह सर्वे।
ग्रीष्मो हेमंत उत नो वसंतश्शरद्वर्षास्सुवितन्नो अस्तु।
तेषामृतूनागं शतशारदानां निवात एषामभये स्याम।
इदुवथ्सराय परिवथ्सराय संवथ्सराय कृणुता बृहन्नमः।
तेषां वयगं सुमतौ यज्ञियानां ज्योगजीता अहतास्स्याम।
भद्रान्नश्श्रेयस्समनैष्ट देवास्त्वयावसेन समशी महि त्वा।
स नो मयोभूः पितो आ विशस्व शं तोकाय तनुवे स्योनः॥

भूतं भव्यं भविष्यद्वषट्थ्स्वाहा नम ऋक्साम यजुर्वषट्थ्स्वाहा नमो गायत्री
त्रिष्टुप्जगती वषट्थ्स्वाहा नमः पृथिव्यंतरिख्षं द्यौर्वषट्थ्स्वाहा
नमोऽग्निर्वायुस्सूर्यो वषट्थ्स्वाहा नमः प्राणो व्यानोऽपानो
वषट्थ्स्वाहानमोऽन्नं कृषिर्वृष्टिर्वषट्थ्स्वाहानमः पिता पुत्रः पौत्रो
वषट्थ्स्वाहा नमो भूर्भुवस्सुवर्वषट्थ्स्वाहा नमः॥

इंद्रो दधीचो अस्थभिः। वृत्राण्यप्रतिष्कुतः। जघान नवतीर्नव।
इच्छन्नश्वस्य यच्छिरः। पर्वतेष्वपश्रितम्। तद्विदच्छर्यणावति।
अत्राह गोरमन्वत। नाम त्वष्टुरपीच्यम्। इत्था चंद्रमसो गृहे।
इंद्रमिद्गाथिनो बृहत्। इंद्रमर्केभिरर्किणः। इंद्रं वाणीरनूषत।
इंद्र इद्धर्योस्सचा। संमिश्ल आवचो युजा। इंद्रो वज्री हिरण्ययः।
इंद्रो दीर्घाय चख्षसे। आ सूर्यग्ंरोहयद्दिवि। वि गोभिरद्रिमैरयत्।
इंद्र वाजेषु नो अव। सहस्र प्रधनेषु च। उग्र उग्राभिरूतिभिः।
तमिंद्रं वाजयामसि। महे वृत्राय हंतवे। स वृषा वृषभो भुवत्।
इंद्रस्स दामने कृतः। ओजिष्ठस्स बले हितः। द्युम्नीश्लोकी स सौम्यः।
गिरा वज्रो न संभृतः। स बलो अनपच्युतः। ववख्षुरुग्रो अस्तृतः॥

चख्षुषो हेते मनसो हेते। वाचो हेते ब्रह्मणो हेते।

यो माघायुरभिदासति। तमग्ने मेन्या मेनिं कृणु।

यो मा चख्षुषा यो मनसा। यो वाचा ब्रह्मणाघायुरभि दासति।

तयाऽग्ने त्वं मेन्या। अमुममेनिं कृणु। यत्किंचासौ मनसा यच्च वाचा।

यज्ञैर्जुहोति यजुषा हविर्भिः। तन्मृत्युर्निर्ऋत्या संविदानः।

पुरादिष्टादाहुतीरस्य हंतु। यातुधाना निर्ऋतिरादुरख्षः।

ते अस्यघ्नंत्वनृतेन सत्यम्। इंद्रेषिता आज्यमस्य मथ्नंतु।

मा तथ्समृद्धि यदसौ करोति। हन्मितेऽहं कृतगं् हविः।

यो मे घोरमचीकृतः। अपां चौत उभौ बाहू। अपनह्याम्यास्यम्।

अपनह्यामि ते बाहू। अपनह्याम्यास्यम्। अग्नेर्देवस्य ब्रह्मणा।

सर्वं तेऽवधिषं कृतम्। पुरामुष्य वषट्कारात्। यज्ञं देवेषु नस्कृधि।

स्विष्टमस्माकं भूयात्। मास्मान्प्रापन्नरातयः। अंतिदूरे सतो अग्ने।

भ्रातृव्यस्याभिदासतः। वषट्कारेण वज्रेण। कृत्यागं् हन्मि कृतामहम्।

यो मा नक्तं दिवा सायम्। प्रातश्चाह्नो निपीयति।

अद्या तमिंद्र वज्रेण। भ्रातृव्यं पादयामसि॥

प्राणो रख्षति विश्वमेजत्। इर्यो भूत्वा बहुधा बहूनि।

स इथ्सर्वं व्यानशे। यो देवो देवेषु विभूरंतः।

आवृद्दूदात्क्षेत्रियध्वगद्वृषा। तमित्प्राणं मनसोपशिख्षत।

अग्रं देवानामिदमत्तु नो हविः। मनसश्चित्तेदम्।

भूतं भव्यं च गुप्यते। तद्धि देवेष्वग्रियम्।

आ न एतु पुरश्चरम्। स हदेवैरिमग्ं हवम्।

मनश्श्रेयसि श्रेयसि। कर्मन्, यज्ञपतिं दधत्।

जुषतां मे वागिदग्ं हविः। विराड्देवी पुरोहिता।

हव्यवाडनपायिनी। यया रूपाणि बहुधा वदंति।

पेशाग्ंसि देवाः परमे जनित्रे। सा नो विराडनपस्फुरंती।

वाग्देवी जुषतामिदग्ं हविः। चख्षुर्देवानां ज्योतिरमृते न्यक्तम्।

अस्य विज्ञानाय बहुधा नि धीयते। तस्य सुम्नमशीमहि।

मा नो हासीद्विचख्षणम्। आयुरिन्नः प्रतीर्यताम्। अनंधाश्चख्षुषा वयम्।

जीवा ज्योतिरशीमहि। सुवर्ज्योतिरुतामृतम्। श्रोत्रेण भद्रमुत शृण्वंति सत्यम्।

श्रोत्रेण वाचं बहुधोद्यमानाम्। श्रोत्रेण मोदश्च महश्च श्रूयते।

श्रोत्रेण सर्वा दिश आ शृणोमि। येन प्राच्या उत दख्षिणा।

प्रतीच्यै दिशश्शृण्वंत्युत्तरात्। तदिच्छ्रोत्रं बहुधोद्यमानम्।
अरान्न नेमिः परि सर्वं बभूव॥

सिग्ंहे व्याघ्र उत या पृदाकौ। त्विषिरग्नौ ब्राह्मणे सूर्ये या।
इंद्रं या देवी सुभगा जजान। सा न आगन्वर्चसा संविदाना।
या राजन्ये दुंदुभावायतायाम्। अश्वस्य क्रंद्ये पुरुषस्य मायौ।
इंद्रं या देवी सुभगा जजान। सा न आगन्वर्चसा संविदाना।
या हस्तिनि द्वीपिनि या हिरण्ये। त्विषिरश्वेषु पुरुषेषु गोषु।
इंद्रं या देवी सुभगा जजान। सा न आगन्वर्चसा संविदाना।
रथे अख्षेषु वृषभस्य वाजे। वाते पर्जन्ये वरुणस्य शुष्मे।
इंद्रं या देवी सुभगा जजान। सा न आगन्वर्चसा संविदाना।
राडसि विराडसि। संराडसि स्वराडसि।
इंद्राय त्वा तेजस्वते तेजस्वंतग्ग् श्रीणामि।
इंद्रायत्वौजस्वत ओजस्वंतग्ग् श्रीणामि।
इंद्राय त्वा पयस्वते पयस्वंतग्ग् श्रीणामि।
इंद्राय त्वाऽयुष्मत आयुष्मन्तग्ग् श्रीणामि।

तेजोसि। तत्ते प्रयच्छामि। तेजस्वदस्तु मे मुखम्।

तेजस्वच्छिरो अस्तु मे। तेजस्वान्, विश्वतः प्रत्यङ्। तेजसा संपिपृग्धिमा।

ओजोसि। तत्ते प्रयच्छामि। ओजस्वदस्तु मे मुखम्।

ओजस्वच्छिरो अस्तु मे। ओजस्वान्, विश्वतः प्रत्यङ्। ओजसा संपिपृग्धिमा।

पयोसि। तत्ते प्रयच्छामि। पयस्वदस्तु मे मुखम्।

पयस्वच्छिरो अस्तु मे। पयस्वान्, विश्वतः प्रत्यङ्। पयसा संपिपृग्धिमा।

आयुरसि। तत्ते प्रयच्छामि। आयुष्मदस्तु मे मुखम्।

आयुष्मच्छिरो अस्तु मे। आयुष्मान्, विश्वतः प्रत्यङ्। आयुषा संपिपृग्धिमा।

इममग्न आयुषे वर्चसे कृधि। प्रियग्ं रेतो वरुण सोमराजन्न्।

मातेवास्मा अदिते शर्म यच्छ। विश्वे देवा जरदष्टिर्यथाऽसत्।

आयुरसि विश्वायुरसि। सर्वायुरसि सर्वमायुरसि।

यतो वातो मनोजवाः। यतः, क्षरंति सिंधवः।

तासां त्वा सर्वासाग्ं रुचा। अभिषिंचामि वर्चसा।

समुद्र इवासि गंहना। सोम इवास्यदाभ्यः।

अग्निरिव विश्वतः प्रत्यङ्। सूर्य इव ज्योतिषा विभूः।

अपां यो द्रवणे रसः। तमहमस्मा आमुष्यायणाय।

तेजसे ब्रह्मवर्चसाय गृह्णामि।

अपां य ऊर्मौ रसः। तमहमस्मा आमुष्यायणाय।

ओजसे वीर्याय गृह्णामि।

अपां यो मध्यतो रसः। तमहमस्मा आमुष्यायणाय।

पुष्टै प्रजननाय गृह्णामि।

अपां यो यज्ञियो रसः। तमहमस्मा आमुष्यायणाय।

आयुषे दीर्घायुत्वाय गृह्णामि॥

अहमस्मि प्रथमजा ऋतस्य। पूर्वं देवेभ्यो अमृतस्य नाभिः।

यो मा ददाति स इदेव मावाः। अहमन्नमन्नमदंतमद्मि।

पूर्वमग्नेरपिदहत्यन्नम्। यत्तौहासाते अहमुत्तरेषु।

व्यात्तमस्य पशवस्सुजंभम्। पश्यंति धीराः प्रचरंति पाकाः।

जहाम्यन्यं न जहाम्यन्यम्। अहमन्नं वशमिच्चरामि।

समानमर्थं पर्येमि भुंजत्। कोमामन्नं मनुष्यो दयेत।

पराके अन्नं निहितं लोक एतत्। विश्वैर्देवैः पितृभिर्गुप्तमन्नम्।

यदद्यते लुप्यते यत्परोप्यते। शततमी सा तनूर्मे बभूव।

महांतौ चरूसकृद्दुग्धेन पप्रौ। दिवं च पृश्नि पृथिवीं च साकम्।
तथ्सं पिबंतो न मिनंति वेधसः। नैतद्भूयो भवति नो कनीयः।
अन्नं प्राणमन्नमपानमाहुः। अन्नं मृत्युं तमु जीवातु माहुः।
अन्नं ब्रह्माणो जरसं वदंति। अन्नमाहुः प्रजननं प्रजानाम्।
मोघमन्नं विंदते अप्रचेताः। सत्यं ब्रवीमि वध इथ्स तस्य।
नार्यमणं पुष्यति नो सखायम्। केवलाघो भवति केवलादी।
अहं मेघस्स्तनयन्वर्षन्नस्मि। मामदंत्यहमद्म्यन्यान्।
अहग् सदमृतो भवामि। मदादित्या अधि सर्वे तपंति।
देवीं वाचमजनयंत देवाः। तां विश्वरूपाः पशवो वदंति।
सा नो मंद्रेषमूर्जं दुहाना। धेनुर्वागस्मानुपसुष्टुतैतु।
यद्वाग्वदंत्यविचेतनानि। राष्ट्रीदेवानां निषसादमंद्रा।
चतस्र ऊर्जं दुदुहे पयाग्ंसि। क्वस्विदस्याः परमं जगाम।
अनंतामंतादधि निर्मितां महीम्। यस्यां देवा अदधुर्भोजनानि।
एकाख्षरां द्विपदाग् षट्पदां च। वाचं देवा उपजीवंति विश्वे।
वाचं देवा उपजीवंति विश्वे। वाचं गंधर्वाः पशवो मनुष्याः।
वाची मा विश्वा भुवनान्यर्पिता। सा नो हवं जुषतामिंद्रपत्नी।

वागख्षरं प्रथमजा ऋतस्य। वेदानां माताऽमृतस्य नाभिः।
सा नो जुषाणोप यज्ञमागात्। अवंती देवी सुहवा मे अस्तु।
या मृषयो मंत्रकृतो मनीषिणः। अन्वैच्छन्देवास्तपसा श्रमेण।
तां देवीं वाचग्ं हविषा यजामहे। सा नो दधातु सुकृतस्य लोके।
चत्वारिवाक्परिमिता पदानि। तानि विदुर्ब्राह्मणा ये मनीषिणः।
गुहा त्रीणि निहिता नेंगयंति। तुरीयं वाचो मनुष्या वदंति।
श्रद्धयाग्निस्समिध्यते। श्रद्धया विंदते हविः। श्रद्धां भगस्य मूर्धनि।
वचसा वेदयामसि। प्रियग्ग् श्रद्धे ददतः। प्रियग्ग् श्रद्धे दिदासतः।
प्रियं भोजेषु यज्वसु। इदं म उदितं कृधि। यथा देवा असुरेषु।
श्रद्धामुग्रेषु चक्रिरे। एवं भोजेषु यज्वसु। अस्माकमुदितं कृधि।
श्रद्धां देवा यजमानाः। वायुगोपा उपासते। श्रद्धाग्ं हृदय्यया‌ऽकूत्या।
श्रद्धया हूयते हविः। श्रद्धां प्रातर्हवामहे। श्रद्धां मध्यंदिनं परि।
श्रद्धाग्ं सूर्यस्य निम्रुचि। श्रद्धे श्रद्धापये हमा। श्रद्धा देवानधिवस्ते।
श्रद्धा विश्वमिदं जगत्। श्रद्धां कामस्य मातरम्। हविषा वर्धयामसि।
ब्रह्म जज्ञानं प्रथमं पुरस्तात्। विसीमतस्सुरुचो वेन आवः।
स बुध्निया उप मा अस्यविष्ठाः। सतश्च योनिमसतश्च विवः।

पिता विराजामृषभो रयीणाम्। अंतरिख्षं विश्वरूप आ विवेश।

तमर्कैरभ्यर्चंति वथ्सम्। ब्रह्मसंतं ब्रह्मणा वर्धयंतः।

ब्रह्म देवा न जनयत्। ब्रह्म विश्वमिदं जगत्। ब्रह्मणः, ख्षत्रं निर्मितम्।

ब्रह्म ब्राह्मण आत्मना। अंतरस्मिन्निमे लोकाः। अंतर्विश्वमिदं जगत्।

ब्रह्मैव भूतानां ज्येष्ठम्। तेनकोऽर्हति स्पर्धितुम्। ब्रह्मन्देवास्त्रयस्त्रिग्ंशत्।

ब्रह्मन्निंद्र प्रजापती। ब्रह्मन्, ह विश्वा भूतानि। नावीवांतस्समाहिता।

चतस्र आशाः प्रचरंत्वग्नयः। इमं नो यज्ञं नयतु प्रजानन्न्।

घृतं पिन्वन्नजरग्ं सुवीरम्। ब्रह्म समिद्भवत्याहुतीनाम्।

आगावो अग्मन्नुत भद्रमक्रन्न्। सीदंतु गोष्ठे रणयन्त्वस्मे।

प्रजावतीः पुरुरूपा इह स्युः। इंद्राय पूर्वीरुषसो दुहानाः।

इंद्रो यज्वने पृणते च शिख्षति। उपेद्ददाति न स्वंमुषायति।

भूयोभूयो रयिमिदस्य वर्धयन्न्। अभिन्ने खिल्ले निदधाति देवयुम्।

न ता नशंति नदभाति तस्करः। नैना अमित्रो व्यथिरादधर्षति।

देवाग्श्च याभिर्यजते ददाति च। ज्योगित्ताभिस्सचते गोपतिस्सह।

न ता अर्वा रेणुककाटो अश्नुते। नसग्ग्स्कृतत्रमुपयंति ता अभि।

उरुगायमभयं तस्य ता अनु। गावो मर्त्यस्य विचरंति यज्वनः।

गावो भगो गाव इंद्रो मे अच्छात्। गावस्सोमस्य प्रथमस्य भखः।
इमा या गावस्सजनास इंद्रः। इच्छामीद्धृदा मनसा चिदिंद्रम्।
यूयं गावो मेदयथा कृशंचित्। अश्लीलं चित्कृणुथा सुप्रतीकम्।
भद्रं गृहं कृणुथ भद्रवाचः। बृहद्वो वय उच्यते सभासु।
प्रजावतीस्सूयवसग्ं रिशंतीः। शुद्धा अपस्सुप्रपाणे पिबंतीः।
मावस्स्तेन ईशत माघशग्ंसः। परिवो हेती रुद्रस्य वृंज्यात्। उपेदमुप पर्चनम्।
आसु गोषूप पृच्यताम्। उपर्षभस्य रेतसि। उपेंद्र तव वीर्ये।।

ता सूर्याचंद्रमसा विश्वभृत्तमा महत्। तेजो वसुमद्राजतो दिवि।
सामात्माना चरतस्सामचारिणा। ययोर्व्रतं नममे जातु देवयोः।
उभावंतौ परियात अर्म्या। दिवो न रश्मीग् स्तनुतो व्यर्णवे।
उभा भुवंती भुवना कविक्रतू। सूर्या न चंद्राचरतो हतामती।
पती द्युमद्विश्वविदा उभादिवः। सूर्या उभा चंद्रमसा विचख्षणा।
विश्ववारा वरिवोभा वरेण्या। तानोऽवतं मतिमंता महिव्रता।
विश्ववपरी प्रतरणा तरंता। सुवर्विदा दृशये भूरिरश्मी।
सूर्या हि चंद्रा वसु त्वेषदर्शता। मनस्विनो भानु चरतोऽनु संदिवम्।

अस्य श्रवो नद्यस्सप्तबिभ्रति। द्यावा ख्षामा पृथिवी दर्शतं वपुः।

अस्मे सूर्याचंद्रमसाऽभिचख्षे। श्रद्धेकमिंद्रचरतो विचर्तुरम्।

पूर्वापरं चरतो माययैतौ। शिशू क्रीडंतौ परियातो अध्वरम्।

विश्वान्यन्यो भुवनाऽभिचष्टे। ऋतूनन्यो विदधज्जायते पुनः।

हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विंद्रः।

अग्निं या गर्भं दधिरे विरूपास्तान अपश्शगग् स्योना भवंतु।

यासागं राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्।

मधुश्चुतश्शुचयो याः पावकास्तान आपश्शगग् स्योना भवंतु।

यासां देवा दिवि कृण्वंति भख्षं या अंतरिख्षे बहुधा भवंति।

याः पृथिवीं पयसोंदंति शुक्रास्तान आपश्शगग् स्योना भवंतु।

शिवेन मा चख्षुषा पश्यतापश्शिवया तनुवोपस्पृशत त्वचं मे।

सर्वागं अग्नीगंरफ्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त।

आपो भद्रा घृतमिदाप आसुरग्नीषोमौ बिभ्रत्याप इत्ताः।

तीव्रो रसो मधुपृचामरंगम आ मा प्राणेन सह वर्चसा गन्न्।

आदित्पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्न आसाम्।

मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः।

नासदासीन्नो सदासीत्तदानीम्। नासीद्रजो नो व्योमा परो यत्।

किमावरीवः कुहकस्य शर्मन्न्। अंभः किमासीद्गहनं गभीरम्।

नमृत्युरमृतं तर्हिन। रात्रिया अह्न आसीत्प्रकेतः।

आनीदवातग्ग् स्वधया तदेकम्। तस्माद्धान्यं न परः किं च नास।

तम आसीत्तमसा गूढमग्रे प्रकेतम्। सलिलग्ं सर्वमा इदम्।

तुच्छेनाभ्वपिहितं यदासीत्। तमसस्तन्महिना जायतैकम्।

कामस्तदग्रे समवर्तताधि। मनसो रेतः प्रथमं यदासीत्।

सतो बंधुमसति निरविंदन्न्। हृदि प्रतीष्या कवयो मनीषा।

तिरश्चीनो विततो रश्मिरेषाम्। अधस्विदासी ३ दुपरिस्विदासी ३ त्।

रेतोधा आसन्महिमान आसन्न्। स्वधा अवस्तात्प्रयतिः परस्तात्।

को अद्धा वेद क इह प्रवोचत्। कुत आजाता कुत इयं विसृष्टिः।

अर्वाग्देवा अस्य विसर्जनाय। अथा को वेद यत आबभूव।

इयं विसृष्टिर्यत आबभूव। यदि वा दधे यदि वा न।

यो अस्याध्यख्खः परमे व्योमन्न्। सो अंग वेद यदि वा न वेद॥

किग्ग्स्विद्वनं क उस वृख्ख आसीत्। यतो द्यावापृथिवी निष्टतख्खुः।

मनीषिणो मनसा पृच्छतेदु तत्। यदध्यतिष्ठद्भुवनानि धारयन्न्।

ब्रह्मवनं ब्रह्म स वृख्ष आसीत्। यतो द्यावापृथिवी निष्टतख्षुः।

मनीषिणो मनसा वि ब्रवीमि वः। ब्रह्माध्यतिष्ठद्भुवनानि धारयन्न्।

प्रातरग्निं प्रातरिंद्रग्ं हवामहे। प्रातर्मित्रावरुणा प्रातरश्विना।

प्रातर्भगं पूषणं ब्रह्मणस्पतिम्। प्रातस्सोममुतरुद्रग्ं हुवेम।

प्रातर्जितं भगमुग्रग्ं हुवेम। वयं पुत्रमदितेर्यो विधर्ता।

आध्रश्चिद्यं मन्यमानस्तुरश्चित्। राजाचिद्यं भगं भख्षीत्याह।

भग प्रणेतर्भग सत्यराधः। भगेमां धियमुदवददन्नः।

भग प्रणो जनय गोभिरश्वैः। भगप्रनृभिर्नृवंतस्स्याम।

उतेदानीं भगवंतस्स्याम। उत प्रपित्व उत मध्ये अह्नाम्।

उतोदिता मघवन्थ्सूर्यस्य। वयं देवानाग्ं सुमतौ स्याम।

भग एव भगवाग्ं अस्तु देवाः। तेन वयं भगवंतस्स्याम।

तं त्वा भग सर्व इज्जोहवीमि। स नो भग पुरएता भवेह।

समध्वरायोषसो नमंत। दधिक्रावेव शुचये पदाय।

अर्वाचीनं वसुविदं भगं नः। रथमिवाश्वा वाजिन आवहंतु।

अश्वावतीर्गोमतीर्न उषासः। वीरवतीस्सदमुच्छंतु भद्राः।

घृतं दुहाना विश्वतः प्रपीनाः। यूयं पात स्वस्तिभिस्सदा नः॥

अग्निर्नः पातु कृत्तिकाः। नक्षत्रं देवमिंद्रियम्।
इदमासां विचक्षणम्। हविरासं जुहोतन।
यस्य भांति रश्मयो यस्य केतवः। यस्येमा विश्वा भुवनानि सर्वा।
सकृत्तिकाभिरभि संवसानः। अग्निर्नो देवस्सुविते दधातु॥
प्रजापते रोहिणी वेतु पत्नी। विश्वरूपा बृहती चित्रभानुः।
सा नो यज्ञस्य सुविते दधातु। यथा जीवेम शरदस्सवीराः।
रोहिणी देव्युदगात्पुरस्तात्। विश्वारूपाणि प्रतिमोदमाना।
प्रजापतिग्ं हविषा वर्धयंती। प्रिया देवानामुपयातु यज्ञम्॥
सोमो राजा मृगशीर्षेण आगन्न्। शिवं नक्षत्रं प्रियमस्य धाम।
आप्यायमानो बहुधा जनेषु। रेतः प्रजां यजमाने दधातु।
यत्ते नक्षत्रं मृगशीर्षमस्ति। प्रियग्ं राजन्प्रियतमं प्रियाणाम्।
तस्मै ते सोम हविषा विधेम। शं न एधि द्विपदे शं चतुष्पदे॥
आर्द्रया रुद्रः प्रथमान एति। श्रेष्ठो देवानां पतिरघ्नियानाम्।
नक्षत्रमस्य हविषा विधेम। मा नः प्रजाग्ं रीरिषन्मोत वीरान्।
हेती रुद्रस्य परिणो वृणक्तु। आर्द्रा नक्षत्रं जुषताग्ं हविर्नः।
प्रमुंचमानौ दुरितानि विश्वा। अपाघशग्ं संनुदतामरातिम्॥

पुनर्नो देव्यदितिस्स्पृणोतु। पुनर्वसू नः पुनरेतां यज्ञम्।

पुनर्नो देवा अभि यंतु सर्वे। पुनः पुनर्वो हविषा यजामः।

एवा न देव्यदितिरनर्वा। विश्वस्य भर्त्री जगतः प्रतिष्ठा।

पुनर्वसू हविषा वर्धयंती। प्रियं देवानामप्येतु पाथः॥

बृहस्पतिः प्रथमं जायमानः। तिष्यं नक्षत्रमभि संबभूव।

श्रेष्ठो देवानां पृतनासु जिष्णुः। दिशोऽनु सर्वा अभयं नो अस्तु।

तिष्यः पुरस्तादुत मध्यतो नः। बृहस्पतिर्नः परि पातु पश्चात्।

बाधेतां द्वेषो अभयं कृणुताम्। सुवीर्यस्य पतयस्स्याम॥

इदग्ं सर्पेभ्यो हविरस्तु जुष्टम्। आश्रेषा येषा मनुयंति चेतः।

ये अंतरिक्षं पृथिवीं क्षियंति। ते नस्सर्पासो हवमागमिष्ठाः।

ये रोचने सूर्यस्यापि सर्पाः। ये दिवं देवीमनु संचरंति।

येषा माश्रेषा अनुयंति कामम्। तेभ्यस्सर्पेभ्यो मधुमज्जुहोमि॥

उपहूताः पितरो ये मघासु। मनोजवसस्सुकृतस्सुकृत्याः।

ते नो नक्षत्रे हवमागमिष्ठाः। स्वधाभिर्यज्ञं प्रयतं जुषंताम्।

ये अग्निदग्धायेऽनग्निदग्धाः। येऽमुं लोकं पितरः, क्षियंति।

याग्श्च विद्म याग्ं उ च न प्र विद्म। मघासु यज्ञग्ं सुकृतं जुषंताम्॥

गवां पतिः फल्गुनीनामसि त्वम्। तदर्यमन्वरुण मित्रचारु।

तं त्वा वयग्ं सनितारग्ं सनीनाम्। जीवा जीवंतमुप संविशेम।

येनेमा विश्वाभुवनानि संजिता। यस्य देवा अनु संयंति चेतः।

अर्यमा राजाऽजरस्तुविष्मान्। फल्गुनीनामृषभो रोरवीति।।

श्रेष्ठो देवानां भगवो भगासि। तत्त्वाविदुः फल्गुनीस्तस्य वित्तात्।

अस्मभ्यं खषत्रमजरग्ं सुवीर्यम्। गोमदश्ववदुप संनुदेह।

भगो ह दाता भग इत्प्रदाता। भगो देवीः फल्गुनीराविवेश।

भगस्येत्तं प्रसवं गमेम। यत्र देवैस्सधमादं मदेम।।

आयातु देवस्सवितोपयातु। हिरण्ययेन सुवृता रथेन।

वहन्, हस्तग्ं सुभगं विद्मनापसम्। प्रयच्छंतं पपुरिं पुण्यमच्छ।

हस्तः प्रयच्छत्वमृतं वसीयः। दखिणेन प्रतिगृभ्णीम एनत्।

दातारमद्य सविता विदेय। यो नो हस्ताय प्रसुवाति यज्ञम्।।

त्वष्टा नखत्रमभ्येति चित्राम्। सुभग्ंससं युवतिग्ं रोचमानाम्।

निवेशयन्नमृतान्मर्त्याग्श्च। रूपाणि पिग्ंशन्भुवनानि विश्वा।

तन्नस्त्वष्टा तदु चित्रा विचष्टाम्। तन्नखत्रं भूरिदा अस्तु मह्यम्।

तन्नः प्रजां वीरवतीग्ं सनोतु। गोभिर्नो अश्वैस्समनक्तु यज्ञम्।।

वायुर्नखष्त्रमभ्येति निष्ट्याम्। तिग्मशृंगो वृषभो रोरुवाणः।
समीरयन्भुवना मातरिश्वा। अपद्वेषाग्ंसि नुदतामरातीः।
तन्नो वायुस्तदु निष्ट्या शृणोतु। तन्नखष्त्रं भूरिदा अस्तु मह्यम्।
तन्नो देवासो अनु जानंतु कामम्। यथा तरेम दुरितानि विश्वा।।
दूरमस्मच्छत्रवो यंतु भीताः। तदिंद्राग्नी कृणुतां तद्विशाखे।
तन्नो देवा अनु मदंतु यज्ञम्। पश्चात्पुरस्तादभयं नो अस्तु।
नखष्त्राणामधिपत्नी विशाखे। श्रेष्ठाविंद्राग्नी भुवनस्य गोपौ।
विषूचश्शत्रूनपबाधमानौ। अपखुधं नुदतामरातिम्।।
पूर्णापश्चादुत पूर्णा पुरस्तात्। उन्मध्यतः पौर्णमासी जिगाय।
तस्यां देवा अधि संवसंतः। उत्तमे नाक इह मादयंताम्।
पृथ्वी सुवर्चा युवतिस्सजोषाः। पौर्णमास्युदगाच्छोभमाना।
आप्याययंती दुरितानि विश्वा। उरुं दुहां यजमानाय यज्ञम्।।

ऋद्ध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु।
अनूराधान्, हविषा वर्धयंतः। शतं जीवेम शरदस्सवीराः।
चित्रं नखष्त्रमुदगात्पुरस्तात्। अनूराधास इति यद्वदंति।

तन्मित्र एति पथिभिर्देवयानैः। हिरण्ययैर्विततैरंतरिख्षे॥

इंद्रो ज्येष्ठामनु नख्षत्रमेति। यस्मिन्वृत्रं वृत्रतूर्ये ततार।

तस्मिन्वयममृतं दुहानाः। ख्षुधं तरेम दुरितिं दुरिष्टिम्।

पुरंदराय वृषभाय धृष्णवे। अषाढाय सहमानाय मीढुषे।

इंद्राय ज्येष्ठा मधुमद्दुहाना। उरुं कृणोतु यजमानाय लोकम्॥

मूलं प्रजां वीरवतीं विदेय। पराच्येतु निरृतिः पराचा।

गोभिर्नख्षत्रं पशुभिस्समक्तम्। अहर्भूयाद्यजमानाय मह्यम्।

अहर्नो अद्य सुविते दधातु। मूलं नख्षत्रमिति यद्वदंति।

पराचीं वाचा निर्ऋतिं नुदामि। शिवं प्रजायै शिवमस्तु मह्यम्॥

या दिव्या आपः पयसा संबभूवुः। या अंतरिख्ष उत पार्थिवीर्याः।

यासामषाढा अनुयंति कामम्। ता न आपश्शग्ग् स्योना भवंतु।

याश्च कूप्या याश्च नाद्यास्समुद्रियाः। याश्च वैशंतीरुत प्रासचीर्याः।

यासामषाढा मधु भख्षयंति। ता न आपश्शग्ग् स्योना भवंतु॥

तन्नो विश्वे उप शृण्वंतु देवाः। तदषाढा अभि संयंतु यज्ञम्।

तन्नख्षत्रं प्रथतां पशुभ्यः। कृषिर्वृष्टिर्यजमानाय कल्पताम्।

शुभ्राः कन्यायुवतयस्सुपेशसः। कर्मकृतस्सुकृतो वीर्यावतीः।

विश्वान्देवान्, हविषा वर्धयंतीः। अषाढाः काममुपयांतु यज्ञम्।।
यस्मिन्ब्रह्माऽभ्यजयथ्सर्वमेतत्। अमुं च लोकमिदमूच सर्वम्।
तन्नो नख्षत्रमभिजिद्विजित्य। श्रियं दधात्वहृणीयमानम्।
उभौ लोकौ ब्रह्मणा संजितेमौ। तन्नो नख्षत्रमभिजिद्विचष्टाम्।
तस्मिन्वयं पृतनास्सं जयेम। तन्नो देवासो अनु जानंतु कामम्।।
शृण्वंति श्रोणाममृतस्य गोपाम्। पुण्यामस्या उप शृणोमि वाचम्।
महीं देवीं विष्णुपत्नीमजूर्याम्। प्रतीचीमेनागं हविषा यजामः।
त्रेधा विष्णुरुरुगायो वि चक्रमे। महीं दिवं पृथिवीमंतरिख्षम्।
तच्छ्रोणैति श्रव इच्छमाना। पुण्यगग् श्लोकं यजमानाय कृण्वती।।
अष्टौ देवा वसवस्सोम्यासः। चतस्रो देवीरजराश्श्रविष्ठाः।
ते यज्ञं पांतु रजसः परस्तात्। संवथ्सरीणममृतगग् स्वस्ति।
यज्ञं नः पांतु वसवः पुरस्तात्। दख्षिणतोऽभियंतु श्रविष्ठाः।
पुण्यं नख्षत्रमभि संविशाम। मा नो अरातिरघशगं साऽगन्न्।।
ख्षत्रस्य राजा वरुणोऽधिराजः। नख्षत्राणागं शतभिषग्वसिष्ठः।
तौ देवेभ्यः कृणुतो दीर्घमायुः। शतगं सहस्रा भेषजानि धत्तः।
यज्ञं नो राजा वरुण उपयातु। तन्नो विश्वे अभि संयंतु देवाः।

तन्नो नख्षत्रग्ं शतभिषग्जुषाणम्। दीर्घमायुः प्रतिरद्भेषजानि॥

अज एकपादुदगात्पुरस्तात्। विश्वाभूतानि प्रतिमोदमानः।

तस्य देवाः प्रसवं यंति सर्वे। प्रोष्ठपदासो अमृतस्य गोपाः।

विभ्राजमानस्समिधान उग्रः। आऽंतरिख्षमरुहदगंद्याम्।

तग्ं सूर्यं देवमजमेकपादम्। प्रोष्ठपदासो अनु यंति सर्वे॥

अहिर्बुध्नियः प्रथमान एति। श्रेष्ठो देवानामुत मानुषाणाम्।

तं ब्राह्मणास्सोमपास्सोम्यासः। प्रोष्ठपदासो अभिरख्षंति सर्वे।

चत्वार एकमभि कर्म देवाः। प्रोष्ठपदास इतियान्, वदंति।

ते बुध्नियं परिषद्यग्ग् स्तुवंतः। अहिग्ं रख्षंति नमसोपसद्य॥

पूषा रेवत्यन्वेति पंथाम्। पुष्टिपती पशुपा वाजबस्त्यौ।

इमानि हव्या प्रयता जुषाणा। सुगैर्नो यानैरुपयातां यज्ञम्।

ख्षुद्रान्पशून्रख्षतु रेवती नः। गावो नो अश्वाग्ं अन्वेतु पूषा।

अन्नग्ं रख्षंतौ बहुधा विरूपम्। वाजग्ं सनुतां यजमानाय यज्ञम्॥

तदश्विनावश्वयुजोपयाताम्। शुभं गमिष्ठौ सुयमेभिरश्वैः।

स्वं नख्षत्रग्ं हविषा यजंतौ। मध्वा संपृक्तौ यजुषा समक्तौ।

यौ देवानां भिषजौ हव्यवाहौ। विश्वस्य दूतावमृतस्य गोपौ।

तौ नख्षत्रं जुजुषाणोपयाताम्। नमोऽश्विभ्यां कृणुमोऽश्वयुग्भ्याम्।।
अपपाप्मानं भरणीर्भरंतु। तद्यमो राजा भगवान्, विचष्टाम्।
लोकस्य राजा महतो महान्, हि। सुगं नः पंथामभयं कृणोतु।
यस्मिन्नख्षत्रे यम एति राजा। यस्मिन्नेनमभ्यषिंचंत देवाः।
तदस्य चित्रग्ं हविषा यजाम। अप पाप्मानं भरणीर्भरंतु।

निवेशनी संगमनी वसूनां विश्वा रूपाणि वसून्यावेशयंती।
सहस्रपोषग्ं सुभगा रराणा सा न आगन्वर्चसा संविदाना।
यत्ते देवा अदधुर्भागधेयममावास्ये संवसंतो महित्वा।
सा नो यज्ञं पिपृहि विश्ववारे रयिं नो धेहि सुभगे सुवीरम्।।

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे।
भागं देवेभ्यो विदधात्यायन्प्र चंद्रमास्तिरति दीर्घमायुः।
यमादित्या अग्ंशुमाप्याययंति यमख्षितमख्षितयः पिबंति।
तेन नो राजा वरुणो बृहस्पतिराप्याययंतु भुवनस्य गोपाः।
ये विरूपे समनसा संव्ययंती। समानं तंतुं परितातनाते।

विभू प्रभू अनुभू विश्वतो हुवे। ते नो नख्षत्रे हवमागमेतम्।।

वयं देवी ब्रह्मणा संविदानाः। सुरत्नासो देववीतिं दधानाः।

अहोरात्रे हविषा वर्धयंतः। अति पाप्मानमति मुक्त्या गमेम।

प्रत्युवदृश्यायती। व्युच्छंती दुहिता दिवः। अपो मही वृणुते चख्षुषा।

तमो ज्योतिष्कृणोति सूनरी। उदुस्रियास्सचते सूर्यः।

सचा उद्यन्नख्षत्रमर्चिमत्। तवेदुषो व्युषि सूर्यस्य च।

संभक्तेन गमेमहि। तन्नो नख्षत्रमर्चिमत्। भानुमत्तेज उच्चरत्।

उपयज्ञमिहागमत्। प्र नख्षत्राय देवाय। इंद्रायेंदुग्ं हवामहे।

स नस्सविता सुवथ्सनिम्। पुष्टिदां वीरवत्तमम्।

उदुत्यं जातवेदसं देवं वहंति केतवः। दृशे विश्वाय सूर्यम्।

चित्रं देवानामुदगादनीकं चख्षुर्मित्रस्य वरुणस्याग्नेः।

आप्रा द्यावापृथिवी अंतरिख्षग्ं सूर्य आत्मा जगतस्तस्थुषश्च।

अदितिर्न उरुष्यत्वदितिश्शर्म यच्छतु। अदितिः पात्वग्ंहसः।

महीमूषु मातरग्ं सुव्रतानामृतस्य पत्नी मवसे हुवेम।।

तुविख्षत्रामजरंतीमुरूचीग्ं सुशर्माणमदितिग्ं सुप्रणीतिम्।

इदं विष्णुर्विचक्रमे त्रेधा निदधे पदम्। समूढमस्य पाग्ंसुरे।

प्र तद्विष्णुस्तवते वीर्याय। मृगो नभीमः कुचरो गिरिष्ठाः।

यस्योरुषु त्रिषु विक्रमणेषु। अधिख्षियंति भुवनानि विश्वा।

अग्निर्मूर्धा दिवः ककुत्पतिः पृथिव्या अयम्।। अपाग्ं रेताग्ंसि जिन्वति।

भुवो यज्ञस्य रजसश्च नेता यत्रा नियुद्भिस्सचसे शिवाभिः।

दिवि मूर्धानं दधिषे सुवर्षां जिह्वामग्ने चकृषे हव्यवाहम्।

अनु नोऽद्यानुमतिर्यज्ञं देवेषु मन्यताम्।

अग्निश्च हव्यवाहनो भवतां दाशुषे मयः।

अन्विदनुमते त्वं मन्यासै शं च नः कृधि।

क्रत्वे दख्षाय नो हिनु प्रण आयूग्ंषि तारिषः।

हव्यवाहमभिमातिषाहम्। रख्षोहणं पृतनासु जिष्णुम्।।

ज्योतिष्मंतं दीद्यतं पुरंधिम्। अग्निग्ग् स्विष्टकृतमा हुवेम।

स्विष्टमग्ने अभि तत्पृणाहि। विश्वादेव पृतना अभिष्य।

उरुं नः पंथां प्रदिशन्विभाहि। ज्योतिष्मद्धेह्यजरं न आयुः।।

अग्नये स्वाहा कृत्तिकाभ्यस्स्वाहा। अंबायै स्वाहा दुलायै स्वाहा।

नितत्यै स्वाहाऽभ्रयंत्यै स्वाहा। मेघयंत्यै स्वाहा वर्षयंत्यै स्वाहा।

चुपुणीकायै स्वाहा। प्रजापतये स्वाहा रोहिण्यै स्वाहा।

रोचमानायै स्वाहा प्रजाभ्यस्स्वाहा। सोमाय स्वाहा मृगशीर्षाय स्वाहा।

इन्वकाभ्यस्स्वाहौषधीभ्यस्स्वाहा। राज्याय स्वाहाऽभिजित्यै स्वाहा।

रुद्राय स्वाहाऽऽर्द्रायै स्वाहा। पिन्वमानायै स्वाहा पशुभ्यस्स्वाहा।

अदित्यै स्वाहा पुनर्वसुभ्याम्। स्वाहाऽभूत्यै स्वाहा प्रजात्यै स्वाहा।

बृहस्पतये स्वाहा तिष्याय स्वाहा। ब्रह्मवर्चसाय स्वाहा।

सर्पेभ्यस्स्वाहाऽश्रेषाभ्यस्स्वाहा। दंदशूकेभ्यस्स्वाहा।

पितृभ्यस्स्वाहा मघाभ्यः। स्वाहाऽनघाभ्यस्स्वाहाऽगदाभ्यः।

स्वाहाऽरुंधतीभ्यस्स्वाहा। अर्यम्णे स्वाहा फल्गुनीभ्याग् स्वाहा।

पशुभ्यस्स्वाहा। भगाय स्वाहा फल्गुनीभ्याग् स्वाहा।

श्रैष्ठ्याय स्वाहा। सवित्रे स्वाहा हस्ताय। स्वाहा ददते स्वाहा पृणते।

स्वाहा प्रयच्छ ते स्वाहा प्रतिगृभ्णते स्वाहा। त्वष्ट्रेस्वाहा चित्रायै स्वाहा।

चैत्राय स्वाहा प्रजायै स्वाहा। वायवे स्वाहा निष्ट्यायै स्वाहा।

कामचाराय स्वाहाऽभिजित्यै स्वाहा।

इंद्राग्निभ्याग् स्वाहा विशाखाभ्याग् स्वाहा। श्रैष्ठ्याय स्वाहाऽभिजित्यै स्वाहा।

पौर्णमास्यै स्वाहा कामाय स्वाहाऽगत्यै स्वाहा।।

मित्राय स्वाहाऽनूराधेभ्यस्स्वाहा। मित्रधेयाय स्वाहाऽभिजित्यै स्वाहा।

इंद्राय स्वाहा ज्येष्ठायै स्वाहा। ज्यैष्ठ्याय स्वाहाऽभिजित्यै स्वाहा।

प्रजापतये स्वाहा मूलाय स्वाहा। प्रजायै स्वाहा।

अद्भ्यस्स्वाहाऽषाढाभ्यस्स्वाहा। समुद्राय स्वाहा कामाय स्वाहा।

अभिजित्यै स्वाहा। विश्वेभ्यो देवेभ्यस्स्वाहाऽषाढाभ्यस्स्वाहा।

अनपजय्याय स्वाहा जित्यै स्वाहा। ब्रह्मणे स्वाहाऽभिजिते स्वाहा।

ब्रह्मलोकाय स्वाहाऽभिजित्यै स्वाहा। विष्णवे स्वाहा श्रोणायै स्वाहा।

श्लोकाय स्वाहा श्रुताय स्वाहा। वसुभ्यस्स्वाहा श्रविष्ठाभ्यस्स्वाहा।

अग्राय स्वाहा परीत्यै स्वाहा। वरुणाय स्वाहा शतभिषजे स्वाहा।

भेषजेभ्यस्स्वाहा। अजायैकपदे स्वाहा प्रोष्ठपदेभ्यस्स्वाहा।

तेजसे स्वाहा ब्रह्मवर्चसाय स्वाहा। अहये बुध्नियाय स्वाहा प्रोष्ठपदेभ्यस्स्वाहा।

प्रतिष्ठायै स्वाहा। पूष्णे स्वाहा रेवत्यै स्वाहा। पशुभ्यस्स्वाहा॥

अश्विभ्याग् स्वाहाऽश्वयुग्भ्याग् स्वाहा। श्रोत्राय स्वाहा श्रुत्यै स्वाहा।

यमाय स्वाहाऽपभरणीभ्यस्स्वाहा। राज्याय स्वाहाऽभिजित्यै स्वाहा।

अमावास्यायै स्वाहा कामाय स्वाहाऽगत्यै स्वाहा॥

चंद्रमसे स्वाहा प्रतीदृश्यायै स्वाहा। अहोरात्रेभ्यस्स्वाहाऽर्धमासेभ्यस्स्वाहा।
मासेभ्यस्स्वाहर्तुभ्यस्स्वाहा। संवथ्सराय स्वाहा। अह्ने स्वाहा रात्रियै स्वाहा।
अतिमुक्तै स्वाहा। उषसे स्वाहा व्युष्ट्यै स्वाहा।
व्यूषुष्यै स्वाहा व्युच्छंत्यै स्वाहा।
व्युष्टायै स्वाहा। नखषत्राय स्वाहोदेष्यते स्वाहा।
उद्यते स्वाहोदिताय स्वाहा। हरसे स्वाहा भरसे स्वाहा।
भ्राजसे स्वाहा तेजसे स्वाहा। तपसे स्वाहा ब्रह्मवर्चसाय स्वाहा।
सूर्याय स्वाहा नखषत्रेभ्यस्स्वाहा। प्रतिष्ठायै स्वाहा।
अदित्यै स्वाहा प्रतिष्ठायै स्वाहा। विष्णवे स्वाहा यज्ञाय स्वाहा।
प्रतिष्ठायै स्वाहा।।

दधिक्राव्ण्णो अकारिषं जिष्णोरश्वस्य वाजिनः।
सुरभि नो मुखा करत्प्रण आयूग्ंषि तारिषत्।
आपो हि ष्ठामयोभुवस्ता न ऊर्जे दधातन। महेरणाय चखषसे।
यो वश्शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।
तस्मा अरं गमाम वो यस्य खषयाय जिन्वथ। आपो जनयथा च नः।।

उदुत्तमं वरुण पाशमस्मदवाधमं विमध्यमगग् श्रथाय।
अथा वयमादित्य व्रते तवानागसो अदितये स्याम।
अस्तभ्नाद्यामृषभो अंतरिख्षममिमीत वरिमाणं पृथिव्या आसीदद्विश्वा भुवनानि -
सम्राड्विश्वेत्तानि वरुणस्य व्रतानि।
यत्किं चेदं वरुण दैव्ये जनेऽभिद्रोहं मनुष्याश्चरामसि।
अचित्ती यत्तव धर्मा युयोपिम मा नस्तस्मादेनसो देव रीरिषः।
कितवासो यद्रिरिपुर्न दीवि यद्वा घा सत्यमुत यन्न विद्म।
सर्वा ता विष्य शिथिरेऽव देवाथा ते स्याम वरुण प्रियासः।
अव ते हेडो वरुण नमोभिरव यज्ञेभिरीमहे हविर्भिः।
ख्षयन्नस्मभ्यमसुर प्रचेतो राजन्नेनाग्ंसि शिश्रथः कृतानि॥
तत्त्वायामि ब्रह्मणा वंदमानस्तदा शास्ते यजमानो हविर्भिः।
अहेडमानो वरुणेह बोध्युरुशग्ंस मान आयुः प्रमोषीः॥

हिरण्यवर्णाश्शुचयः पावका यासु जातः कश्यपो यास्विंद्रः।
अग्निं या गर्भं दधिरे विरूपास्तान अ्पश्शगग् स्योना भवंतु।
यासाग्ं राजा वरुणो याति मध्ये सत्यानृते अवपश्यञ्जनानाम्।

मधुश्चुतश्शुचयो याः पावकास्तान आपश्शग्ग् स्योना भवंतु।

यासां देवा दिवि कृण्वंति भख्षं या अंतरिख्षे बहुधा भवंति।

याः पृथिवीं पयसोंदंति शुक्रास्तान आपश्शग्ग् स्योना भवंतु।

शिवेन मा चख्षुषा पश्यतापश्शिवया तनुवोपस्पृशत त्वचं मे।

सर्वाग्ं अग्नीग्ंरफ्सुषदो हुवे वो मयि वर्चो बलमोजो निधत्त।

यददस्संप्रयतीरहावनदताहते। तस्मादा नद्यो नामस्थ ता वो नामानि सिंधवः।

यत्प्रेषिता वरुणेन ताश्शीभग्ं समवल्गत।

तदाप्नोदिंद्रोवो यतीस्तस्मादापो अनु स्थन।

अपकामग्ग् स्यंदमाना अवीवरत वो हिकम्।

इंद्रो वश्शक्तिभिर्देवी स्तस्माद्वार्णाम वो हितम्।

एको देवो अप्यतिष्ठथ्स्यंदमाना यथावशम्।

उदानिषुर्महीरिति तस्मादुदकमुच्यते।

आपो भद्रा घृतमिदाप आसुरग्नीषोमौ बिभ्रत्याप इत्ताः।

तीव्रो रसो मधुपृचामरंगम आ मा प्राणेन सह वर्चसा गन्न्।

आदित्पश्याम्युत वा शृणोम्या मा घोषो गच्छति वाङ्न आसाम्।

मन्ये भेजानो अमृतस्य तर्हि हिरण्यवर्णा अतृपं यदा वः।

आपो हि ष्ठामयोभुवस्ता न ऊर्जे दधातन। महेरणाय चख्षसे।
यो वश्शिवतमो रसस्तस्य भाजयतेह नः। उशतीरिव मातरः।
तस्मा अरं गमाम वो यस्य ख्षयाय जिन्वथ। आपो जनयथा च नः।
दिवि श्रयस्वांतरिख्षे यतस्व पृथिव्या संभव ब्रह्मवर्चसमसि ब्रह्मवर्चसाय त्वा॥

पवमानस्सुवर्जनः। पवित्रेण विचर्षणिः। यः पोता स पुनातु मा।
पुनंतु मा देव जनाः। पुनंतु मनवो धिया। पुनंतु विश्व आयवः।
जातवेदः पवित्रवत्। पवित्रेण पुनाहि मा। शुक्रेण देव दीद्यत्।
अग्ने ऋत्वा ऋतूगं रनु। यत्ते पवित्रमर्चिषि। अग्ने विततमंतरा।
ब्रह्म तेन पुनीमहे। उभाभ्यां देव सवितः। पवित्रेण सवेन च।
इदं ब्रह्म पुनीमहे। वैश्वदेवी पुनती देव्यागात्।
यस्यै बह्वीस्तनुवो वीतपृष्ठाः। तया मदंतस्सधमाद्येषु।
वयग्ग् स्याम पतयो रयीणाम्। वैश्वानरो रश्मिभिर्मा पुनातु।
वातः प्राणेनेषिरो मयोभूः। द्यावापृथिवी पयसा पयोभिः।
ऋतावरी यज्ञिये मा पुनीताम्। बृहद्भिस्सवितस्तृभिः।
वर्षिष्ठैर्देव मन्मभिः। अग्ने दख्षैः पुनाहि मा।

येन देवा अपुनत। येनापो दिव्यं कशः। तेन दिव्येन ब्रह्मणा।

इदं ब्रह्म पुनीमहे। यः पावमानीरध्येति। ऋषिभिस्संभृतग्ं रसम्।

सर्वग्ं स पूतमश्नाति। स्वदितं मातरिश्वना। पावमानीर्यो अद्ध्येति।

ऋषिभिस्संभृतग्ं रसम्। तस्मै सरस्वती दुहे। खीरग्ं सर्पिर्मधूदकम्।

पावमानीस्स्वस्त्ययनीः। सुदुघा हि पयस्वतीः। ऋषिभिस्संभृतो रसः।

ब्राह्मणेष्वमृतग्ं हितम्। पावमानीर्दिशंतु नः। इमं लोकमथो अमुम्।

कामान्थ्समर्धयंतु नः। देवीर्देवैस्समाभृताः। पावमानीस्स्वस्त्ययनीः।

सुदुघा हि घृतश्चुतः। ऋषिभिस्संभृतो रसः। ब्राह्मणेष्वमृतग्ं हितम्।

येन देवाः पवित्रेण। आत्मानं पुनते सदा। तेन सहस्रधारेण।

पावमान्यः पुनंतु मा। प्राजापत्यं पवित्रम्। शतोद्यामग्ं हिरण्मयम्।

तेन ब्रह्मविदो वयम्। पूतं ब्रह्म पुनीमहे। इंद्रस्सुनीती सह मा पुनातु।

सोमस्स्वस्त्या वरुणस्समीच्या। यमो राजा प्रमृणाभिः पुनातु मा।

जातवेदा मोर्जयंत्या पुनातु।। ओं भूर्भुवस्सुवः।।

तच्छंयोरा वृणीमहे। गातुं यज्ञाय। गातुं यज्ञपतये। दैवी स्वस्तिरस्तु नः।

स्वस्तिर्मानुषेभ्यः। ऊर्ध्वं जिगातु भेषजम्। शं नो अस्तु द्विपदे। शं चतुष्पदे।

ओं शांतिश्शांतिश्शांतिः।।

यो ब्रह्मा ब्रह्मण उज्जभार प्राणैश्शिरः कृत्तिवासाः पिनाकी।

ईशानो देवस्स न आयुर्दधातु तस्मै जहोमि हविषा घृतेन॥

विभ्राजमानस्सरिरस्य मध्याद्रोचमानो घर्मरुचिर्य आगात्।

स मृत्युपाशानपनुद्य घोरानिहायुषेणो घृतमत्तु देवः॥

ब्रह्म ज्योतिर्ब्रह्मपत्नीषु गर्भं यमादधात्पुरुरूपं जयंतम्।

सुवर्नरंभग्रहमर्कमर्चं तमायुषे वर्धयामो घृतेन॥

श्रियं लख्ष्मीमौपलामंबिकां गां षष्ठीं च यामिंद्र सेनेत्युदाहुः।

तां विद्यां ब्रह्मयोनिगं सुरूपामिहायुषे तर्पयामो घृतेन॥

दाख्षायण्यस्सर्वयोन्यस्सुयोन्यस्सहस्रशो विश्वरूपा विरूपाः।

ससूनवस्सपतयस्सयूथ्या इहा युषेणो घृतमिदं जुषंताम्॥

दिव्यागणा बहुरूपाः पुराणा आयुच्छिदोनः प्रमथ्नंतु वीरान्।

तेभ्यो जुहोमि बहुधा घृतेन मा नः प्रजागं रीरिषो मोत वीरान्॥

एकः पुरस्ताद्य इदं बभूव यतो बभूवुर्भुवनस्य गोपाः।

यमभ्येति भुवनगं सांपराये स नो हविर्घृतमिहायुषेऽत्तु देवः॥

वसून्रुद्रानादित्यान्मरुतोऽथ साध्यानृभून्यख्षान्गंधर्वागंश्च पितृगंश्च विश्वान्।

भृगून्थ्सर्पागंश्चांगिरसोऽथ सर्वान् घृतगं हुत्वा स्वायुष्यामिहयाम शश्वत्॥

विष्णो त्वं नो अंतमश्शर्म यच्छ सहन्त्य।

प्रते धारा मधुश्चुत उथ्सं दुह्रते अक्षितम्॥

आभिर्गीर्भिर्यदतो न ऊनमाप्यायय हरिवो वर्धमानः।

यदा स्तोतृभ्यो महि गोत्रा रुजासि भूयिष्ठ भाजो अधते स्याम।

ब्रह्मप्रावादिष्मतन्नो मा हासीत्॥ ओं शांतिश्शांतिश्शांतिः॥

## ॥ प्रोक्षण मंत्राः ॥

देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्याम्।

अश्विनोर्भैषज्येन। तेजसे ब्रह्मवर्चसायाभिषिंचामि॥

देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्याम्।

सरस्वत्यै भैषज्येन। वीर्यायान्नाद्यायाभिषिंचामि॥

देवस्य त्वा सवितुः प्रसवे। अश्विनोर्बाहुभ्याम्। पूष्णो हस्ताभ्याम्।

इंद्रस्येंद्रियेण। श्रियै यशसे बलायाभिषिंचामि॥

अर्यमणं बृहस्पतिमिंद्रं दानाय चोदय।

वाचं विष्णुगं सरस्वतीगं सवितारं च वाजिनम्।

सोमगं राजानं वरुणमग्निमन्वारभामहे।

आदित्यान्, विष्णुगं सूर्यं ब्रह्माणं च बृहस्पतिम्॥

देवस्य त्वा सवितुः प्रसवेऽश्विनोर्बाहुभ्यां पूष्णो हस्ताभ्यागं सरस्वत्यै वाचो

यंतुर्यंत्रेणाग्नेस्त्वा साम्राज्येनाभिषिंचामींद्रस्य त्वा

साम्राज्येनाभिषिंचामि बृहस्पतेस्त्वा साम्राज्येनाभिषिंचामि॥

देवास्त्वेंद्रज्येष्ठा वरुणराजानोऽधस्ताच्चोपरिष्टाच्च पांतु न वा –

एतेन पूतो न मेध्यो न प्रोक्षितो यदेनमतः प्राचीनं प्रोक्षति –

यथ्संचितमाज्येन प्रोक्षति तेन पूतस्तेन मेध्यस्तेन प्रोक्षितः॥

## ॥ आशीर्वाद मंत्राः ॥

अस्मे देवासो वपुषे चिकित्सत यमाशिरा दंपती वाममश्नुतः।

पुमान्पुत्रो जायते विंदते वस्वथ विश्वे अरपा एधते गृहः।

आशीर्दाया दंपती वाममश्नुतामरिष्टो रायस्सचतागं समोकसा।

य आसिचथ्संदुग्धं कुंभ्या सहेष्टेन यामन्नमतिं जहातु सः।

सर्पिर्ग्रीवी पीवर्यस्य जाया पीवानः पुत्रा अकृशासो अस्य।

सहजानिर्यस्सुमखस्यमान इंद्रायाशिरगं सह कुंभ्यादात्।

आशीर्म ऊर्जमुत सुप्रजास्त्वमिषं दधातु द्रविणगं सवर्चसम्।

संजयन्ख्षेत्राणि सहसाहऽमिंद्र कृण्वानो अन्याग् अधरान्थ्सपत्नान्।।

आशिषमेवैतामाशास्ते पूर्णपात्रे। अंततोऽनुष्टुभा।

चतुष्पद्वा एतच्छंदः प्रतिष्ठितं पत्नियै पूर्णपात्रे भवति।

अस्मिन्लोके प्रतितिष्ठानीति। अस्मिन्नेव लोके प्रतितिष्ठति।

अथो वाग्वा अनुष्टुक्। वाङ्मिथुनम्। आपोरेतः प्रजननम्।

एतस्माद्वै मिथुनाद्विद्योतमानस्स्तनयन्वर्षति। रेतस्सिंचन्न्।

प्रजाः प्रजनयन्न्। यद्वै यज्ञस्य ब्रह्मणा युज्यते।

ब्रह्मणा वै तस्य विमोकः। अद्भिश्शांतिः।

विमुक्तं वा एतर् हि योक्त्रं ब्रह्मणा।

आदायैनत्पत्नी सहाप उपगृह्णीते शांत्यै।

अंजलौ पूर्णपात्रमानयति। रेत एवास्यां प्रजां दधाति।

प्रजया हि मनुष्यः पूर्णः। मुखं विमृष्टे। अवभृथस्यैव रूपं कृत्वोत्तिष्ठति।।

गोमृगकंठेन प्रथमामाहुतिं जुहोति। पशवो वै गोमृगः।

रुद्रोऽग्निस्स्विष्टकृत्। रुद्रादेव पशूनंतर्दधाति।

अथो यत्रैषाऽहुतिर् हूयते। न तत्र रुद्रः पशूनभिमन्यते।

अश्वशफेन द्वितीयामाहुतिं जुहोति। पशवो वा एकशफम्।

रुद्रोग्निस्स्विष्टकृत्। रुद्रादेव प्रजा अंतर्दधाति।

अथो यत्रैषाऽहुतिर् हूयते। न तत्र रुद्रः पशूनभिमन्यते।

अयस्मयेन कमंडलुना तृतीयाम्। आहुतिं जुहोत्यायास्यो वै प्रजाः।

रुद्रोग्निस्स्विष्टकृत्। रुद्रादेव प्रजा अंतर्दधाति।

अथो यत्रैषाऽहुतिर् हूयते। न तत्र रुद्रः प्रजा अभिमन्यते।।

अपश्यं त्वा मनसा चेकितानं तपसो जातं तपसो विभूतम्।

इह प्रजामिह रयिग्ं रराणः प्रजायस्व प्रजया पुत्रकाम।

अपश्यं त्वा मनसा दीध्यानाग् स्वायां तनूग्ं ऋत्विये नाथमानाम्।

उपमामुच्चा युवतिर्बभूयाः प्रजायस्व प्रजया पुत्रकामे।।

सहस्रमाख्यात्रेदद्याच्छतं परिगरित्र एते चै वासने श्वेतश्चाश्वतरी रथो होतुः

पुत्रकामा हाप्याख्यापयेरन् लभंते ह पुत्रान् लभंते ह पुत्रान्।।

सर्वस्याप्त्यै सर्वस्य जित्यै सर्वमेव तेनाप्नोति सर्वं जयति।।

ऋद्ध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु।

अनूराधान्, हविषा वर्धयंतः। शतं जीवेम शरदस्सवीराः।।

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे।

भागं देवेभ्यो विदधात्यायन्प्र चंद्रमास्तिरति दीर्घमायुः।।

शतमानं भवति शतायुः पुरुषश्शतेंद्रिय आयुष्येवेंद्रिये प्रति तिष्ठति।।

सं त्वा सिंचामि यजुषा प्रजामायुर्धनं च।।

रोचनो रोचमानश्शोभनश्शोभमानः कल्याणः।।

## ।। आशीर्वाद मंत्रान्तर सरणिः ।।

आयुष्मन्तं वर्चस्वन्तम्। अथो अधिपतिं विशाम्।

अस्याः पृथिव्या अध्यखम्। इममिंद्र वृषभं कृणु।।

पूष्णः पोषेण मह्यम्। दीर्घायुत्वाय शतशारदाय।

शतग्ं शरद्भ्य आयुषे वर्चसे। जीवात्वै पुण्याय।।

एतेन वै देवा जैत्वानि जित्वा। यं काममकामयन्त तमाप्नुवन्न्।

यं कामं कामयते। तमेतेनाप्नोति।।

पृथ्वी सुवर्चायुवतिस्सजोषाः। पौर्णमास्युदगाच्छोभमाना।

आप्याययन्ती दुरितानि विश्वा। उरुं दुहां यजमानाय यज्ञम्।।

ऋद्ध्यास्म हव्यैर्नमसोपसद्य। मित्रं देवं मित्रधेयं नो अस्तु।

अनूराधान्, हविषा वर्धयंतः। शतं जीवेम शरदस्सवीराः॥

ख्षत्रस्य राजा वरुणोऽधिराजः। नख्षत्राणाग्ं शतभिषग्वसिष्ठः।

तौ देवेभ्यः कृणुतो दीर्घमायुः॥

नवोनवो भवति जायमानोऽह्नां केतुरुषसामेत्यग्रे।

भागं देवेभ्यो विदधात्यायन्प्र चंद्रमास्तिरति दीर्घमायुः॥

पर्याप्त्या अनंतरायाय सर्वस्तोमोऽतिरात्र उत्तम महर्भवति

सर्वस्याप्त्यै सर्वस्य जित्त्यै सर्वमेव तेनाप्नोति सर्वं जयति॥

शतमानं भवति शतायुः पुरुषश्शतेंद्रिय आयुष्येवेंद्रिये प्रति तिष्ठति॥

सं त्वा सिंचामि यजुषा प्रजामायुर्धनं च॥

रोचनो रोचमानश्शोभनश्शोभमानः कल्याणः॥

सुमंगलीरियं वधूरिमाग्ं समेतपश्यत।

सौभाग्यमस्यै दत्वा याथास्तं विपरेतन॥

इमाम् त्वमिंद्रमीढ्वस्सुपुत्राग्ं सुभगां कृणु।

दशास्यां पुत्रानाधेहि पतिमेकादशं कृधि॥

## Index


- कृणुष्वपाजः प्रसितिं न पृथ्वीं --- 1
- इंद्रं वो विश्वतस्परिहवामहे --- 4
- ये देवाः पुरस्सदोग्निनेत्रा --- 6
- अग्निरायुष्मान्थ्स --- 7
- या वामिंद्रावरुणा --- 7
- अग्ने यशस्विन् --- 8
- ऋताषाड्तधामाग्निर्गंधर्वस्स --- 9
- नमो अस्तु सर्पेभ्यो --- 10
- अयं पुरो हरिकेश --- 11
- आशुश्शिशानो --- 12
- शं च मे मयश्च मे --- 14
- ममाग्ने वर्चो विहवेष्वस्तु --- 14
- अग्नेर्मन्वे प्रथमस्य प्रचेतसो --- 15
- समीची नामासि --- 18
- हेतयो नाम स्थ तेषां --- 19
- शतायुधाय शतवीर्याय --- 20
- भूतं भव्यं भविष्यद्वषट्थ्स्वाहा --- 21
- इंद्रो दधीचो अस्थभिः --- 21

- चख्खुषो हेते मनसो हेते --- 22
- प्राणो रख्खति विश्वमेजत् --- 23
- सिग्ंहे व्याघ्र उत या पृदाकौ --- 24
- अहमस्मि प्रथमजा ऋतस्य --- 26
- ता सूर्याचंद्रमसा --- 30
- नासदासीन्नो सदासीत्तदानीम् --- 32
- अग्निर्नः पातु कृत्तिकाः --- 34
- ऋद्ध्यास्म हव्यैर्नमसोपसद्य --- 37
- निवेशनी संगमनी --- 41
- नवोनवो भवति जायमानोऽह्नां --- 41
- अग्नये स्वाहा कृत्तिकाभ्यस्स्वाहा --- 43
- चंद्रमसे स्वाहा प्रतीदृश्यायै स्वाहा --- 46
- दधिक्राव्ण्णो अकारिषं --- 46
- हिरण्यवर्णाश्शुचयः --- 47
- पवमानस्सुवर्जनः --- 49
- यो ब्रह्मा ब्रह्मण उज्जभार --- 51
- प्रोक्षण मंत्राः --- 52
- आशीर्वाद मंत्राः --- 53
- आशीर्वाद मंत्रान्तर सरणिः --- 56

**Notes**

Please see the **Usage Notes** document for additional information on the notation and usage.

**Acknowledgments**
I am grateful to *Ubhaya Vedantin* Shri H. R. Krishnaswamy of Bangalore, who thoroughly proof-read the text, as well as recited it in its entirety for further clarification of the *swaram*s. I am also grateful for the feed back and encouragement I received from Shri *U. Ve.* K. Sreekrishna Tatachar, Ph.D., of Cincinnati, Ohio, and inspiration from Shri. *U. Ve.* A. Krishnan of Srirangam, President of *Veda Prasar Samiti*, whose tireless efforts have resulted in over 120 hours of the most authentic and authoritative vedic chanting being permanently recorded for posterity, thus preserving a tradition and history that is thousands of years old (www.ahista.com/vedchant). To the extraordinary *shrOtreeya*s who recited the vedas for these recordings, with such authority, power, clarity and grace, I extend my deep admiration and salutations. I am also grateful to Shri. Sheshadrivasu Chandrashekharan of Bangalore whose *Baraha* software (www.baraha.com) was an invaluable asset in creating this document.

dAsOham,

Prasad (*Tirumalai Nallan Chakravarthi Sreenivasa Raghavan*)
California, October 2003